**हिमालय** पु॰ हिमानामालयः। १हिमवत्पर्वते त्रिका॰। हिमप्रधान आलयो यस्य। २शुक्लखदिरे शब्दच॰। ३भूम्यामलक्याञ्च स्त्री राजनि॰। स च नगः भारतवर्षस्य सीमापर्वतः। जम्बुद्वीपशब्दे दृश्यम्। [राजनि॰।

**हिमाब्ज** न॰ हिमकाले अप्सु-जायते जन-ड। उत्पले

**हिमावती** स्त्री हिमं हिमवीर्य्यं विद्यतेऽस्य सेवने मतुप् मस्य वः संज्ञायां दीर्घः। स्वर्णक्षीर्य्याम् अमरः।

**हिमाश्रया** स्त्री हिमं हिमशीर्यमाश्रयति आ+श्रि–अच्। स्वर्णजीवन्त्याम् राजनि॰। [कपिलद्राक्षायाम् राजनि॰।

**हिमोत्तरा** स्त्री हिममुत्तरं यस्याः सेवने शीतवीर्य्यकरत्वात्।

**हिमोत्पन्ना** स्त्री हिमे उत्पन्ना। यावनाल्यां राजनि॰।

**हिमोद्भवा** स्त्री हिमे तत्प्रधानस्थाने उद्भवति उद्–भू–अच्। शठ्याम् राजनि॰। [मेदि॰।

**हिरण** न॰ हृ–ल्युट् नि॰। १रेतसि २स्वर्णे ३वराटके च

**हिरण्मय** त्रि॰ हिरण्यात्मकम् मयट् नि॰। १हिरण्यात्मके स्त्रियां ङीप्। "हिरण्मयी शाललतेव जङ्गमा" भट्टिः। जम्बुद्वीपे नववर्षमध्ये २वर्षभेदे न॰ त्रिका॰। "उत्तरेणेलावृतं नीलः श्वेतः शृङ्गवान् इति त्रयो रम्यकहिरण्मयकुरूणां वर्षाणां मर्य्यादागिरयः प्रागायता उभयतः क्षारोदावधयो द्विसहस्रयोजन पृथव एकैकशः पूर्वस्मात् पूर्वस्मादुत्तरोत्तरं दशांशाधिकांशेन दैर्घ्य एव ह्रसन्ति" भाग॰ ५।१६अ॰।

**हिरण्य** न॰ हिरणमेव स्वार्थे यत्। १सुवर्णे २धुस्तूरे अमरः। ३रेतसि शब्दर॰। ४द्रव्ये ५वराटके ६अक्षये ७मानभेदे ८अकुप्ये मेदि॰ ९रजते १०धने च।

**हिरण्यकशिपु** पु॰ दैत्यविशेषे। स तु कश्यपात् दित्यां जातः "दित्याः पुत्रद्वयं जज्ञे कश्यपादिति नः श्रुतम्। हिरण्याक्षश्च दुर्द्धर्षो हिरण्यकशिपुस्तथा" "हिरण्यकशिपुर्दैत्यश्चचार परमं तपः। ततो वर्षसहस्राणि निराहारो ह्यधःशिराः। तं ब्रह्मा छन्दयामास दैत्यं तुष्टो वरेण तु। सर्वामरत्वं वव्रे स शस्त्रास्त्रैर्न दिवा निशम्। अहं सर्वं विनिर्जित्य सर्वदेवत्वमास्थितः। अणिमादिगुणैश्वर्य्यमेव मे दीयतां वरः। तेनैवमुक्तो ब्रह्मा तु तस्मै दत्त्वा यथेप्सितम्। दत्त्वा चास्य सभां दिव्यां तत्रैवान्तरधीयत। हिरण्यकशिपुर्दैत्यः श्लोकैर्गीतः पुरातनः। राजा हिरण्यकशिपुर्दैत्यो यां यां निषेवते। तस्यां तस्यां नमस्कुर्दैवता ऋषिभिः सह। एवंप्रभावो दैत्योऽभूत् हिरण्यकशिपुः पुरा। स्वयमग्निश्च चन्द्रश्च वायुरिन्द्रो जलं स्वयम्। भूत्वा चकार राज्यं स मन्वन्तरचतुर्दश। तस्यासीत् नरसिंहस्तु मृत्युर्विष्णुः पुरा किल। नखैस्तेन विनिर्भिन्नो नादृशुष्का नखाः स्मृताः" वह्निपु॰।

**हिरण्यकशिपुहन्** पु॰ हन–क्विप् ६त॰। विष्णौ।

**हिरण्यकामधेनु** स्त्री विधानेन हिरण्यैरचिता कामधेनुः। तुलादिषोड़शमहादानमध्ये दानार्थं हिरण्येन कल्पितायाम् १धेनौ उपचारात् २तद्दाने च। तद्दानविधिः "अथातः संप्रवक्ष्यामि कामधेनुविधिं परम्। सर्वकामप्रदं नृणां महापातकनाशनम्। लोकेशावाहनं तद्वद्धोमः कार्य्योऽधिवासनम्। तुलापुरुषवत् कुर्य्यात् कुण्डमण्डपवेदिकाः। स्वल्पेष्वेकाग्निमत् कुर्य्यात् गुरुरेव समाहितः"। कुण्डमण्डपवेदिका इत्युपलक्षणम्। इह हि देशकालशुद्धिस्नानशिवादिपूजाब्राह्मणवाचनगुरुऋत्विग्वरणमधुपर्कदानवेदिकोपरिचक्रलेखनपञ्चवर्णवितानतोरणपताकादिकं सर्वं मत्स्यपुराणोक्ततुलापुरुषदानविहितं वेदितव्यम्। स्वल्पेष्वेकाग्निमदिति, एकाग्निमत्करणं व्याख्यातम्। "काञ्चनस्यातिशुद्धस्य धेनुं वत्सञ्च कारयेत्। उत्तमा पलसाहस्रैस्तदर्द्धेन तु मध्यमा। कनीयसी तदर्द्धेन कामधेनुः प्रकीर्त्तिता। शक्तितस्त्रिपलादूर्द्ध्वमशक्तोऽपीह कारयेत्"। अत्र यद्यपि वत्सपरिमाणमनुक्तं तथापि कामधेनुविधानवत् तत्र काञ्चनचतुर्थांशेन वत्सः कल्पनीयः। समस्तधेनुपरिमितद्रव्यनिष्कृष्टवत्सपरिमाणव्याप्तिदर्शनादिहापि धेनुदानत्वाविशेषात् तथैव गृह्यते। तथा च गुडधेन्वादिषु "तच्चतुर्थांशेन वत्सः स्यादिति" तत्र तत्र वक्ष्यते। "वेद्यां कृष्णाजिनं न्यस्य गुडप्रस्थसमन्वितम्। न्यसेदुपरि तां धेनुं महारत्नैरलङ्कृताम्। कुम्भाष्टकसमोपेतां नानाफलसमन्विताम्"। कल्पतरुदाने, प्रस्थो व्याख्यातः। "महारत्नानि पद्मरागप्रभृतीनि, "वत्सं दत्त्वे तु विन्यसेदिति" क्वचित्पाठः, नानाफलानि गोगजवाजिस्त्रीपुरुषप्रभृतीनि सौवर्णानि कल्पतरुदानोक्तानि। "तथाष्टादश धान्यानि समन्तात् परिकल्पयेत्। इक्षुदण्डाष्टकं तद्वन्नानाफलसमन्वितम्। भाजनं चासनं तद्वत् ताम्रदोहनकं तथा"। अष्टादश धान्यानि परिभाषायां द्रष्टव्यानि नानाफलानि मातुलिङ्गादीनि। "कौशेयवस्त्रद्वयसम्प्रयुक्ताम् दीपातपत्राभरणाभिरामाम्। सचामरां कुण्डलिनीं सघण्टां गाणलिकापादुकरौप्यपादाम्।